## ॥ श्रीकृष्णाष्टकम् ॥

श्रीवासुदेव मधुसूदन कैटभारे
लक्ष्मीश पक्षिवरवाहन माधवेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ १ ॥

गोविन्द गोकुलपते नवनीतचोर
श्रीनन्दनन्दन मुकुन्द दयापरेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ २ ॥

नारायणाखिलगुणार्णव सर्ववेद
पारायणप्रिय गजाधिपमोचकेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ३ ॥

आनन्दसच्चिदखिलात्मक भक्तवर्ग-
स्वानन्ददान चतुरागमसन्नुतेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ४ ॥

श्रीप्राणतोधिकसुखाक्षयरूप नित्यं
प्रोद्यद्दिवाकरनिभाच्युत सद्गुणेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ५ ॥

विश्वान्धकारिमुखदैवतवन्द्य शश्वत्
विश्वोद्भवस्थितिमृतिप्रभृतिप्रदेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ६ ॥

नित्यैकरूप दशरूप सहस्रलक्षा-
नन्तरूप शतरूप विरूपकेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ७ ॥

सर्वेश सर्वगत सर्वशुभानुरूप
सर्वान्तरात्मक सदोदित सत्प्रियेति ।
श्रीकृष्णमन्मरणकाल उपागते तु
त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ८ ॥

॥ इति श्रीविष्णुतीर्थयतिविरचितं श्रीकृष्णाष्टकम् ॥